SALTORA NETAJI CENTENARY COLLEGE

# PROJECT 2022-23

B.A. 6th SEMESTER (HONOURS)

Subject : Sanskrit (Honours)

Course ID : 60916

Course Code : AHSNS 603DSE-3

Course Title : Kavya

## ASSIGNMENT

"काव्यं सद् दृष्टाऽदृष्टार्थं प्रीतिकीर्तिहेतुत्वात्"


Name of the Student : Raju Gorai

Semester : VI

UID NO : 20191109020

Class Roll No : 207

"काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्"

१. भूमिका- "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति उक्तिषु सुप्रसिद्धा एव ननु एतादृशस्य काव्यस्य निर्माणे किं प्रयोजनम् इति प्रश्नः सर्वेषां मनसि आयाति तत्र काव्यतत्त्वज्ञा आलंकारिकाः बहुधा काव्यस्य प्रयोजनानि प्रोक्तवन्तः।

कोऽपि कार्यारम्भात्प्रागेव विवेकधिया प्रयोजनं परामृशति। अपि च ग्रन्थारम्भे प्रयोजनं विषयमधिकारिणं सम्बन्धञ्चेति 'अनुबन्धचतुष्टयम्' निर्दिशन्ति संस्कृतग्रन्थकाराः। अतस्तां प्रवृत्तिमनुसृत्य आचार्यः वामनोऽपि काव्यालंकारसूत्रवृत्तिग्रन्थस्य प्रथमाधिकरणस्य प्रथमाध्याये काव्यस्य प्रयोजनं प्रस्तौति। यथा- "काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्"

२. अन्यान्यालंकारिनये काव्यप्रयोजनम्-

२.१. मम्मटनये काव्यप्रयोजनम्-

तत्र काव्यप्रकाशकारस्य मम्मटाचार्यस्य इदं मतं तावत् -

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥"

यशसे, अर्थकृते, व्यवहारविदे, शिवेतरक्षतये, सद्यः परनिर्वृतये, कान्तासम्मिततया उपदेशयुजे च

काव्यं भवति। काव्यं कीर्तिं जनयति, अर्थं प्रददाति, व्यवहारज्ञानं च ददाति काव्यद्वारा भगवन्नारायणदीनां पूजनेन शिवेतरस्य अमङ्गलस्य प्रशमनं भवति। काव्यं श्रवणेन ब्रह्मानन्दसहोदरं रसं जनयति। काव्यं भवति कान्तासम्मितं वचः। वेदाः प्रभुसम्मिताः भवन्ति। ते प्रभुवत् 'सत्यं वद धर्मं चर' इत्यादिकम् उपदिशन्ति। परन्तु काव्यं प्रिया इव भवति। प्रिया अर्थात् भार्या यथा मधुराभिः वाग्भिः भर्तुः कृत्याकृत्यविवेकं जनयति तथैव काव्यं सरसया शैल्या रामादिवत् वर्तितव्यम्, न रावणादिवत् इत्यादिकृत्याकृत्यविवेकं जनयति।

२.२ विश्वनाथजये काव्यप्रयोजनम्-

एवमेव विश्वनाथः कथयति-

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥" इति।

चतुर्वर्गो नामः धर्मः, अर्थः, कामः, मोक्षः च। भगवन्नारायणस्तवादिना "एकः शब्दः सम्यक्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति" इत्यादिना वचनेन च काव्याद् धर्मप्राप्तिः। अर्थप्राप्तिः तु यथा श्रीहर्षनाम्ना रत्नावलीनाटिकानिर्माणेन धावकः बहूनि धनानि लब्धवान्। कामप्राप्तिश्च धनैरेव भवति।

मोक्षप्राप्तिः काव्यजनस्य धर्मादिफलस्य अनुसन्धानाभावात् भवति। किञ्च, मोक्षोपयोगिवाक्येषु व्युत्पत्तिकारकं भवति काव्यम्। एवं चतुर्वर्गफलप्रापकं काव्यम्।

२.३ भामहमते काव्यप्रयोजनम् -

एवमेव भामहाचार्यः आह-

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥"

चतुर्वर्गफलप्राप्तिः वेदादिशास्त्रेभ्यः नीरसतया भवति, काव्यात् तु सरसतया इति काव्यस्य विशेषः।

३. आलंकारिकवामनमते काव्यप्रयोजनम् -

आचार्यवामनविरचिते काव्यालंकारसूत्रवृत्तिग्रन्थे प्रथमाधिकरणे प्रथमाध्याये ग्रन्थकृता काव्यस्य प्रयोजनम् उक्तं यथा- 'काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्।' इति।

तत् सुन्दरं काव्यं दृष्टार्थम् अदृष्टार्थं चेति काव्यस्य प्रयोजनयुगलमुक्तम्। तत्र काव्यं हि दृष्टार्थं प्रीतिजनकत्वात् अदृष्टार्थं कीर्तिजनकत्वात्। तस्मात् काव्यस्य द्वे प्रयोजने प्रीतिः कीर्तिश्चेति। तत्र प्रीतिः हि इहलौकिकं प्रयोजनम् अतएव तत् अदृष्टार्थमित्युक्तम्।

प्रीतिशब्दस्यार्थः आनन्दः। गोविन्देनोक्तम् प्रीति-

शब्देन श्रवणसमनन्तरमेव सहृदयहृदयेषु जायमाना या रसास्वादलक्षणा पुनरिष्टप्राप्तानिष्टपरिहार निवक्षना सेयमुभयविधा प्रीतिर्विवक्षिता। एषा प्रीतिः सहृदयस्य काव्यपाठकाले तथा रचनावसाने स्वकीयकाव्यपाठेनापि कवेरपि भवितुं शक्यते इति मन्तव्यम्।

कीर्तिपदेन स्वर्गरूपं फलमुच्यते। एषा हि पारलौकिकी प्राप्तिः। किन्तु कीर्तिपदेन चेद् कविख्यातिरुच्यते तर्हि इहलोके तिष्ठन्नेव तां कीर्तिं लब्धुं शक्नुयात् कविः कालिदासरवीन्द्रनाथादिवत्।

ननु कीर्तिरिव प्रीतिस्वरूपा। तस्मात् कथं कीर्तिः पृथक्तया उक्ता? तत्रोच्यते कामधेनुकारेण —

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम्॥"

"इत्युक्तलक्षणायाः दृष्टप्रीतिविलक्षणाया अदृष्टप्रीतेः पृथक् निरूपणीयत्वात् काव्यस्य तन्मूलतया लोकातिशयत्वं प्रकटितम् इति हेत्वन्तरम् उपात्तम्।"

कीर्तिविषये वामनः प्राचीनश्लोकान् उद्धृतवान्। यथा- "प्रतिष्ठां काव्यबन्धस्य यशसः सरणिं विदुः।
अकीर्तिवर्तिनीं त्वेवं कुकवित्वविडम्बनाम्॥
कीर्तिं स्वर्गफलामाहुरासंसारं विपश्चितः।
अकीर्तिं तु निरालोकनरकोद्देशदूतिकाम्॥"

उत्तमकाव्यस्य रचनां कृत्वा कविः वास्तविकां कीर्तिं प्राप्तवान्। यदि काव्यं न साधुः स्यात्, तर्हि कविः अकीर्तिः निन्दां वा अलभत। अतः कीर्तिः प्राप्त्यर्थम् अकीर्तिनिवारणाय या कविभिः विशेषतया काव्यालंकारसूत्रार्थः अनुशीलनेयः। कवीनां कृते अलंकारशास्त्रस्य ~~अभियोग~~ अभ्यासः आवश्यकः।

"तस्मात् कीर्तिमुपादातुमकीर्तिं च निवर्हितुम्।
काव्यालंकारसूत्रार्थः प्रसाद्यः कविपुङ्गवैः॥"

४. उपसंहारः - आचार्यविमलमतेन प्रीतिरूपं यत् प्रयोजनम् उक्तं तदेव काव्यस्य मुख्यं प्रयोजनम्। काव्यं यतः कलाविद्या अस्ति अतः काव्यस्य प्रथमं प्रधानं च प्रयोजनम् अस्ति आनन्दलाभः। नाट्यशास्त्रे भरतमुनिना उक्तम् - 'विनोदजनकम् लोके नाट्यमेतद् भविष्यति।' ध्वन्यालोकस्य लोचनटीकायाम् अभिनवगुप्तेन उक्तम् - 'प्रीतिरेव प्रधानम्।' वस्तुतः शिल्पकलायाः अन्यत् किमपि प्रयोजनं नास्ति। Art for Arts Sake ( आर्ट फर आर्ट्स् सेके) इत्यस्य मते मनोरञ्जनात् परं काव्यकलायाः अन्यत् किमपि प्रयोजनं प्रदर्शयितुं निरर्थकं भवति। कविः सहृदयः पाठकः च उभौ काव्यद्वारा आनन्दं प्राप्तुं धन्यौ भवतः इति शम्।

५. सहायकग्रन्थपञ्जी -


i) वामनः काव्यालंकारसूत्रवृत्तिः (श्रीगोपेन्द्रत्रिपुरहरभूपालविरचिता 'कामधेनुः' व्याख्यासहिता) व्याख्याकारः श्री पं. केदारनाथशर्मा, प्रकाशकः चौखम्बा कृष्णदासः, वाराणसी - २००० ।

ii) वामनः काव्यालंकारसूत्रवृत्तिः (काव्यालंकारदीपिका हिन्दीव्याख्याविभूषिता) व्याख्याकारः आचार्यः विश्वेश्वरः सिद्धान्तशिरोमणिः, सम्पादकः डॉ. नगेन्द्रः, हिन्दीमाध्यम कार्यान्वय, निर्देशालयः दिल्लिविश्वविद्यालयः - 2002 ।

iii) वामनः काव्यालंकारसूत्रवृत्तिः, सम्पादकः ड. अनिलचन्द्र वसुः, संस्कृत बुक डिपो, कलकाता - २००५ ।

iv) वामनः काव्यालंकारसूत्रवृत्तिः, सम्पादिका ड. सुमिता वसु, बि. एन्. पाबलिकेशन, कोलकाता - २००२८ ।


Signature of Teacher

# SALTORA NETAJI CENTENARY COLLEGE

## PROJECT 2022-23

### Semister :- 6th

NAME OF THE STUDENT : - PUJA KUNDU

UID NO :- 20191109013

SUBJECT :- SANSKRIT

COURSE CODE :- AHSNS603 DSE-3

COURSE ID :- 60916

COURSE TITLE :- KAVYA

ASSIGNMENT :- सौन्दर्यमलंकार

1. सौन्दर्यमलंकार:

भूमिका :- "अलं करोति इति अलङ्कार:" "आभूषितं करोति इति अलंङ्कार:" "अलंक्रियतेऽनेनेति वा अलंकार:।
अलं + कृ धातो: घञ: योगेन अलंकार - शब्द: सिद्ध्यति। लेटिन-भाषायां अलंकार शब्दस्यार्थ: 'स्वर्ण' (AURUM) विद्यते। आभूषित-करणमेव अलंकार:। अलंकार: काव्यस्य महत्त्वपूर्णमिदं वर्तते। अलंकृतिरलंकार:। "काव्यसौन्दर्यस्य विधायकानां सम्पूर्णतत्त्वानां विवेचनशास्त्रमेव अलंकारशास्त्रम्।" शब्दार्थयो: सौन्दर्याधायकं तत्त्वम् अलंकार:। अलंकार: सौन्दर्येण सह चमत्कृतिमपि आदधाति। सैव चमत्कृति: क्वचिद् उपमादिरूपेण, क्वचिद् अतिशयोक्त्या, क्वचिद् वक्रोक्त्या, क्वचिच्च केवलं शब्द-साम्यमूलकेन अनुप्रासेन द्योत्यते। अलंकारो नाम सौन्दर्यम्, यथा कटककुण्डल - हारादिभि: आभूषणै: कामिन्या: सौन्दर्यवृद्धि: भवति तथैव अनुप्रास - उपमादिभि: अलंकारै: कविताकामिन्या: शोभावर्द्धनं क्रियते। येन कविताकामिनीकुरुपसत्यपि सौन्दर्यम् प्राप्नोति। अलंकारो हि नाम काव्यशोभाकरो धर्म:।

## विषयवस्तु :-

① अलंकारस्य महत्त्वम् :- भाषायां व्युत्पत्तिविवर्धनाय यथा व्याकरणशास्त्रमपेक्ष्यते तथैव काव्ये नैपुण्यायालंकारशास्त्रमपि। अलंकारशास्त्रं विना केवलं काव्ये नैपुण्यमेव न सम्पद्यतेऽपितु वाक्यदोषदृष्टिरपि नोत्पद्यते। य: खलु अलंकारशास्त्रज्ञानरहितो व्याकरणादिकं जानन्नपि—

चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे।

यस्मिन् खलु अवगते काव्यस्य निर्माणे स्वरूपदोषगुणालंकारादीनाम् अवधारणे च शक्तिरुन्मिषति तदलंकारशास्त्रम्। शब्देन सह तादात्म्ये सति शब्दस्य परब्रह्मभूतेनार्थेन सदापि तादात्म्यं भवितुम् शक्नोति, इत्येतस्मादपि अलंकारशास्त्रस्य ज्ञानं ग्राह्यमस्ति॥

शब्दार्थकाव्यस्वरूपरसगुणरीतिदोषध्वनिभावालंकारादीनां विषयानां निरूपणं प्रतिपादनं वा शास्त्रस्यास्य प्रयोजनम् । शब्दार्थशरीरस्य वाह्यसौन्दर्यवर्धनेन समं रसादीनपि पोषयति । अलंकारस्य तादृशं महत्त्वं यथा शरीरेऽलंकाराणां वस्त्रादीनां वा । सकल-गुणसमन्वितोऽपि मानवो निर्वसनो न शोभते, अलंकार-रहिता नारी यथा न शोभते, तथैव अलंकारहीनं काव्यं न शोभते। कथ्यते चैतत —

> अलंकाररहिता विधवैव सरस्वती। (अग्निपुराणे)
> यद्यपि सुजाति सुलच्छना सुबरन सरस सुवृत्त।
> भूषन बिन न विराजई कविता वनिता मित्त ॥

(ii) अलंकारस्य लक्षणम् :-

आचार्यवामन: काव्यलंकारसूत्रे (1/2) 'सौन्दर्यमलंकार:' इति अभिदधत काव्यशास्त्रगतं सर्वमपि सौन्दर्यमलंकार शब्देन परिगृह्णाति। अलंकरा अङ्गादिवत् शब्दार्थयो: शोभावर्धका:, रसादीनां चोपकर्तार: वर्तन्ते ।

(iii) काव्ये अलंकाराणां स्थानम् :-

काव्यशास्त्रलक्षितै: अलंकारै: काव्यं सुशोभितं मनोहराय प्रभवति। अस्मिन विषये रीतिवादिनोऽलंकारवादिनश्च काव्ये अलंकारस्य स्थितिम् अनिवार्यां मन्यन्ते । वामन: काव्यादर्शे कथयति —

काव्यशोभाया: कर्तारो धर्मा गुणा । (3/1) तदतिशयहेतव-स्त्वलंकारा: (3/2)।

काव्ये गुणा: काव्यशोभाजनका:, अलंकारास्तु तदतिशय सम्पादनसाधना:। एवम् काव्ये, अङ्गनाशरीरे अलंकाराणां महत्त्वं जायते। ध्वनिवादिन आनन्दवर्धन - मम्मटचर्योऽलं-कराणां महत्त्वं न स्वीकुरुते। मम्मटस्य काव्यलक्षणे— तददोषौ शब्दार्थौ सगुणावनलंकृती पुन: क्वापि (काव्या (1/4) इत्यनेन अलंकाराभावस्य कल्पना क्रियते। दण्डि-

भामह - उद्भटादयो वामनपूर्वकालिका रुद्रट - आनन्दवर्धनअभि-
-नवगुप्त - इत्यादयश्च तदनन्तरभाविन आलंकारिकाः स्वस्ववि-
-शिष्टसिद्धान्तस्थापकाः परस्परविरोधिनोऽपि अलंकाराणां
सौन्दर्याधायकत्वविषये तु निर्विरोधाः सन्ति। चन्द्रालोके जय-
-देवः कथयति — अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती
असौ न मन्यते कस्मात् अनुष्णमनलं कृती॥

अलंकाररहितस्य काव्यस्य कल्पना तथैव हास्यास्पदा यथा
उष्णत्वगुणरहितस्य वह्नेः। जयदेवः प्रसिद्ध्या कवेः प्रौढिवशेन वा
शब्दार्थयोर्मनोहरं सन्निवेशम अलंकारं स्वीकरोति, यथा हारादीनां
मनोहरत्वेनाधानम्। सोऽलंकारं काव्यस्य अनिवार्यधर्मत्वेन
अङ्गीकरोति। यथा —

शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा।
हारादिवदलंकारः सन्निवेशो मनोहरः॥

## (IV) काव्यनिर्माणे अलंकारस्य भूमिका :-

"काव्यालंकारसूत्रवृत्तिः" इति ग्रन्थस्य प्रथमाधिकरणस्य
तृतीयाध्याये आचार्यः वामनः उक्तवान् — "काव्यं गद्यं
पद्यं च।" अर्थात् गद्य — पद्यभेदेन काव्यं द्विविधम्।
तत्र सूत्रम् —

"गद्यं वृत्तगन्धि चूर्णमुत्कलिकाप्रायं च॥"
"पद्यमनेक भेदम्॥" "तदनिबद्धं निबद्धं च॥"

• 'अलंकारः' इति शब्देन काव्यस्य सौन्दर्यवर्धकयमकोपमादि
पारिभाषिककाव्यालंकारसमूहमेव अवबुध्यते। किन्तु "सौन्दर्यमलंकारः"
इति सूत्रं काव्यस्य साधारणसौन्दर्यमपि अवबोधाय व्यवहृतः। प्रकृति-
प्रत्ययविभागेन 'अलंकारः' शब्दस्य अर्थद्वयं वर्तते। यथा—
(१) अलम (सुन्दरम्) इत्यस्य भावः इति अलम् √कृ + घञ
(भाववाच्ये) एवं च अलं क्रियते अनेन इति अलं √कृ + घञ्
(करणवाच्ये)। अत्र प्रथमप्रकारेण अर्थेन अलंकरणं अथवा
सौन्दर्यमेव अलंकारः। काव्यं सुन्दरम्। अस्मात् कारणात्
भारतीयकाव्यतत्त्वग्रन्थम् अलंकारशास्त्रं ग्रन्थकारस्य आलंकारिकः
उच्यते। 'अलंकारः' शब्दस्य द्वितीयप्रकारः अर्थः — यैः यैः
काव्यं सुन्दरं भवति ते यमकोपमादयः पारिभाषिकालंकाराः।

अस्मिन् विषये आचार्यः वामनः तस्य वृत्तौ उक्तवान् –
"अलंकृतिरलंकारः। करणव्युत्पत्त्या पुनरलंकारशब्दोऽयमुपमादिषु वर्तते।"

तत्र भावव्युत्पत्तीर्विवक्षितत्वात् अलंकृतिः अलंकारः। अलंकारः शब्दस्य करणव्युत्पत्तिपक्षे तु न गुणानां काव्यग्रहणहेतुत्वम् इति। सः दोषः तद्वद् इति।

• आचार्यस्य वामनस्य मतानुसारेण रीतिः एव काव्यस्य आत्मा ("रीतिरात्मा काव्यस्य")। एव च रीतिः आत्मा गुणः('विशिष्टा पदरचना रीतिः' 'विशेष गुणात्मा')। अतः गुणः एव काव्यस्य शोभा ('काव्यशोभायाः कर्तारो धर्मा गुणाः')।

काव्ये गुणस्य भूमिका प्रधानम्, उपमारूपकप्रभृतयः पारिभाषिकालंकाराः तस्याः शोभायाः उत्कर्षविधायकः केवलम्। वामनेन सौन्दर्यमेव काव्यस्य सारः।

• प्राचीनः आलंकारिकः आचार्यः भामहः तस्य 'काव्यालंकारः' इति ग्रन्थे उक्तवान् — "न कान्तमपि निर्भूषं विभाति वनिताननम्" अर्थात् मनोज्ञयुक्ते वर्णितायाः मुखमण्डलमपि अलंकारस्य अभावे न शोभा प्राप्यते। दण्डीभामह प्रभृतय प्राचीनालंकारिकाः उपमा-रूपकादि काव्यलंकारसमूहम् एकं विभिन्नं स्थानं अददुः। तेषां मतानुसारेण साहित्यस्य प्राणस्वरूपम् अलंकारः। अलंकारं विना कश्चिद् कविवमनिः अस्तित्त्वं न वर्तते — इति प्राचीनालंकारिकानां मतम्। मुक्ताफलस्य अन्तर्गतं तरलकान्तिवत् लावण्यस्य प्रभा, स्त्रीशरीरात् सर्वान् अलंकारान् उपसारणेन अपि यथा तस्याः लावण्यस्य प्रभा कदापि न अपसृतः भवति। अनुरूपभावेन काव्यशरीरात् सर्वान् अलंकारान् अपसारणेन काव्यसौन्दर्यस्य कोऽपि हानिः न भवति। सर्व - अलंकारवि-मुक्ते काव्यशरीरे यः कान्ति स्वमहिमायां दीप्यमान्, सः एव काव्यशरीरस्य लावण्यस्वरूपम्॥

उपसंहारम् :- आचार्यः आनन्दवर्धनः प्रमुखः ध्वनिवादिगणः काव्यस्य लावण्यस्य च सन्धानं प्राप्तवान। परन्तु प्राचीनालंकारिकानां (दण्डी - भामहप्रभृतयः) अलंकारं प्रति अत्यधिकः मोहः तेषां तत्त्वदृष्टिम् आच्छन्नं न कृतवान्। इदं लावण्यमेव ध्वनिरससौन्दर्यम् इति उच्यते। काव्यस्य आत्मा रसः, अस्य रसस्य उत्कर्षसाधनम् अलंकारस्य कार्यम्। अतः साहित्यदर्पणकारेण उक्तम्—

"शब्दार्थयोरस्थिरा: ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत्॥"

अर्थात् आलंकारिकस्य विश्वनाथस्य मतेन अलंकारः अस्थितः अनित्यधर्मः च। अतः काव्ये अलंकारः बहिरङ्गः अनित्यः अस्थितधर्मः च। एते विषयाः काव्ये न अपरिहार्याः। अलंकार काव्यस्य व्यतिरेके उत्तमं काव्यं भवति, पुनः रसस्य अवर्तमाने काव्ये अलंकारस्य बाहुल्यं वर्तते अपि, तत् काव्यरूपेण न परिगण्यते। अतः काव्ये यदि तस्य आत्मभूतः रस न वर्तते, तर्हि अलंकारस्य प्रयोगः वृथा। अलंकारः काव्य-सौन्दर्यस्य कारणरूपेण विवेचितः भवति, यदि अलंकारः, काव्यस्थितरस्य उत्कर्षविधायकरूपेण तिष्ठति॥

ग्रन्थपञ्जी :-


(i) "काव्यालंकारसूत्रवृत्ति :" — ड. अनिलचन्द्र : वसु :, संस्कृत - बुक डिपी ।

(ii) तगीन्द्र - दिन्द्रि - माध्यम कायत्विम, निर्देशालय : दिल्लि विश्वविद्यालय : २००२ ।

(iii) वामन :— "काव्यालंकारसूत्रवृत्ति :" व्याख्या-काराश्रीत : केदारनाथशर्मा प्रकाशक : चौखाम्बा कृष्णदास : वारानसी २००० ।

(iv) वामन :— "काव्यालंकारसूत्रवृत्तिः" श्रीकृष्ण-मुरिणा, श्रीरङ्गनगरस्थ, श्रीवाणीविलास-मुद्रान्यन्त्रालये समुद्रिता १९०९ ।

(v) वामनः— "काव्यालंकारसूत्रवृत्ति :," सम्पादिका ड. सुमिता वसु :, वि. एन. पावलिकेशन, कलकाता ॥


[signature]

Signature of Teacher

SALTORA NETAJI CENTENARY COLLEGE

**PROJECT 2022-23**

B.A. 2nd SEMESTER (HONOURS)

Subject : Sanskrit (Honours)

Course ID : 20912

Course Code : AHSNS 202C-4

Course Title : Classical Sanskrit Literature (Drama & Prose)

Title of the Project Paper :

'अभिज्ञानशकुन्तलम्' इति नाटके कालिदासस्य प्रकृतिचित्रणम्

Name of the Student : Arpita Pramanik

Semester : II

UID NO : 22191109003

Class Roll No : 696

# सचीपत्रम


| क्रमिकसंख्या | विषयः | पृष्ठसंख्या |
| --- | --- | --- |
| १ | कार्तज्ञित्यस्वीकारः | 1 |
| २ | उद्देश्यम् | २ |
| ३ | भूमिका | 3 |
| ४ | ~~वर्नि~~तवर्णनीयविषयः | ~~4 3-6~~ 3-6 |
| ५ | उपसंहारः | ~~5~~ 6 |
| ६ | सहायकग्रन्थपञ्जी | ~~6~~ 7 |


10

~~कृतज्ञस्वीकार~~

## १. कार्तज्ञत्वस्वीकार:

सर्वप्रथमं मम मार्गदर्शिका: प्रधानशिक्षिका: पूजनीया: सञ्चिता: मातरामहोदया: प्रति मम हार्दिकं कार्तज्ञं ज्ञापयामि। अपिच आचार्यसहितान् सर्वान्, प्राध्यापकान् प्रति धन्यवादं ज्ञापयामि, ये मम कार्यस्य निष्पादने अमूल्यसमय येन — सहकार्यात् सह सहायतां अतिथिः आचार्यं कृतवन्तः।

संचिता घोषाल
शिक्षिकाया: स्वाक्षर:
दिनाङ्क:- ३१/५/२०२३

अर्पिता प्रामाणिक
छात्री- स्वाक्षर:
दिनाङ्क:- ३१.०५.२०२३


মহাকবি
কালিদাস

# २. उद्देश्यम्

मम अस्य परियोजनाकार्यस्य (Project work) द्वयस्य उद्देश्य भवन्ति यथा-

१) सङ्क्षेपेण विविधरचनासु कालिदासस्य प्रकृतिचित्रस्य वर्णनम्

२) कालिदासस्य सर्वश्रेष्ठरचनायाम् अभिज्ञानशाकुन्तले - कालिदासस्य प्रकृतिचित्रस्य वर्णनम्।

३) विविधरचनासु कालिदासस्य प्रकृतिचित्रणेन द्वारा - कालिदासस्य प्रकृतिप्रेमाः परिस्फुटनम्।





## ३. भूमिका

महाकवे: कालिदासस्य ~~प्रक~~ प्रकृतिचित्रस्य पर्यालोचनेनेदं स्पष्टं भवति यत् जगति यत् सौन्दर्यं तद्धि: प्रकृत्यां रमते अभ्यन्तरिकाभापि प्रकृत्यां तदेव विलसति। तु सौन्दर्यदृष्ट्या कालिदासस्य कवित्वे प्रकृतौ मानवे च कोऽपि भेदो नासीत अपि तु तत्रासीत पूर्णाभर्दूनम्।

महाकवे: कालिदासस्य प्रकृतिप्रणय: ऋतुसंहारस्य सामान्यपरिचयात् क्रमेण अतरोत्तरं विकसित: सन् पूर्णा रूपेण "अभिज्ञानशाकुन्तलम्" नाटके परां प्रौढिमवाप।

## ४. वर्णनीयविषय:

महाकवे: प्रकृतिप्रणय: ऋतुसंहारस्य सामान्यपरिचयात क्रमणो उत्तरोत्तरं विका सित: सन "अभिज्ञानाशाकुलम्" नाटके परा प्रौढिमवाप।

अस्य ऋतुसंहारे प्रकृतिर्न केवलमुद्दीपनरूपं चित्रिता अभवत्, परं तु स तत्रा-~~लम्बनीयं~~ लम्बनरूपेऽपि वर्णिता आसीत् मालविकाग्निमित्रे महाकविन कमनीयकलेवरा मालविका प्रकृतिदेव्या: प्रतिमूर्तित्वेन कल्पयित्वा सन्निवेशिता कुमार- सम्भवे महाकवि: प्रकृतिपुत्र्या: अन्मस्थलीभूतस्य हिमालपस्य हृद्यं वर्णनं कृत्वा स्वकवितापा: अनघं मानदण्डं विद्वन्निवहानां पुरत: समुपस्थापितवान। विक्रमोर्वशीयां प्रकृति: हेमकूटराज्योद्यानादिषु अप्सरसां रुपेषु च आत्मानं परिणमयन्ती वीक्षते। रघुवंशेऽपि प्रकृति: समुद्ररुपं परिगृह्य क्वचित तपोवनस्य रुपं परिधाय क्वचित् त्रिवेणीभूता समुपस्थिता। तस्य मेघदूताख्य विभूतं खण्डकाव्यं वस्तुत: प्रकृतेरेव काव्यमासीत्। यस्मिन्



काव्य धूमज्योतिःसलिलमरुतां सन्निपातः मेघः एव विरहिणो यक्षस्य सहृदय-सखा इव सन्देशहरः।

काव्यमिदं प्रकृतेस्तुपमा रङ्गशाला इव भाति। यथा प्रेक्षागृहे उपविष्टः सहृदयः प्रेक्षकः यथा रङ्गमध्ये विविधानि विचित्राणि दृश्यानि पश्यति, तथा अत्रोऽपि सहृदयः पाठकः ~~अ~~स्नसमक्षे चित्ताकर्षकाणि प्रकृतेः बहूणि रूपाणि नवनवानि प्रेक्षते, यानि कवेः प्रकृति प्रति निगूढम् आकर्षणं तच्चित्रणकौशलं च प्रकटयन्ति। यद्यपि प्रकृति वर्णना महाकवेः सर्वासु रचनासु न्यूनाधिकं संलक्ष्यते, तथापि तद्गुणेनायां महाकवेः इतरकविविलक्षण या प्रतिभा सा तु तस्य अभिज्ञानशाकुन्तलम्" नाटके बाहुल्येन लक्ष्यते। अस्मिन् ~~प्रकृत्यङ्गभूतानि सर्व~~ नाटके प्रकृतिः यादृशी प्रधानता गमितासीत न तादृशी कस्मिंश्चिदन्यस्मिन् काव्ये नीता ~~यत्र लक्षतौ~~ नाचेतनादीनि प्रकृत्यङ्गभूतानि सर्वाणि अत्र महाकवेः लेखनीस्पर्शनं न केवलं मानवप्रकृत्या तादात्म्यं लभते, परं तु पशुपक्षिवृक्षलतादिकम् आत्मभावं रक्षित्वापि मानवैः सह आत्मीयतां भजते मानववत् आचरति च। अत्र जडप्रकृतिरपि ईदृशी संवेदनशीला प्रदर्शितास्ति यत सा तेषां सम्पत्तौ हर्षोत्फुल्ला, विपत्तौ च तेषां विमना भवन्ति। नाटकेऽस्मिन् वस्तुतः अन्यपात्राणामिव प्रकृतेरपि प्रमुखभूमिकास्ति या कथमपि न उपेक्षणीया।

अस्य रूपकस्य आख्यानं स्वयमेव प्रकृतेः क्रोडे विकसितम् अभवत्। अस्य नायिका शकुन्तला प्रकृतेः पुत्री इव सस्नेहं लालिता रक्षिता च आसीत। तस्याः हृदयलतिका चेतनाचेतनानि ~~अभवत्। अस्य~~ सर्वाणि स्नेहस्य ललितबन्धनेन मनोहरम् आकृष्टानि अकरोत। नियतम् आलवाले जलसिञ्चनेन सह सा तपोवनस्य वृक्षलतादिकं सोदरस्नेहेन अभिषिकरोत्।

तपोवनस्य ~~सर्वैः~~ चेतनाचेतनपदार्थैः सह शकुन्तलायाः



ईदृशम अन्तरङ्गम आत्मीयत्वं ईदृशं च कल्याणवर्धनम अस्ति यत तस्याः पतिगृहयात्राकाले वनदेवता पितृकुटुम्बिन इव तस्यै मण्डनार्थं वस्त्राभरणानि उपढौकन्ते स्म, काश्यपः तस्याः तपवनत्यागे स्वजनान् इव तपोवनप्रकृतिभूतान् वृक्षलतादीन् अनुज्ञां याचते कोकिलाः मधुररुतेन अनुज्ञां ज्ञापयन्ति स्म अस्मिन्वियोगं न केवल शकुन्तला, तथाचोक्तं-"
"उद्गलितदर्भकवलाः मृगाः परित्यक्तनर्तनाः मयुराः अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणि इव लता॥" इति।
मृगशिशुः यासन्नमातृवियोगभिया शकुन्तलायाः वस्त्राचलायाः गमनान्निवारयति। कविवाणिनि सर्वं करुण्यं साक्षादिवाक्ष्य स्वसतां निस्मृताः तपोवनसत्वैः सह तादात्म्यं भजन्त्य। अस्मिन् नाटके वर्णिता प्रकृतिः न कदापि वहिरतिहत परं तु शकुन्तलाचरित्रे एव तस्याः उन्मेष साफल्येन कृतः। अतः सम्बन्धः, तथा अत्रापि तपोवनपरिवेशेन सह शकुन्तलायाः स्वाभाविकः सम्बन्धः। अस्मिन् विषये रवीन्द्रनाथस्य मन्तव्यमुद्धृत्य उपसंहारः क्रियते——
"अभिज्ञानशकुन्तलनाटके अनसूया प्रियंवदा येमन, कण्व येमन दुष्यन्त येमन, तपोवन प्रकृतिओ तेमनि एकजन विशेष पात्र। प्रधान, एमन अत्यावश्यक स्थान केओपा पाइने पारे, वोधकारि, संस्कृतसाहित्य छाड़ा अर कोथाओ देखा याय नाई। प्रकृतिके मानुष करिया तुलिया ताहार मुखे कथावार्ता



बसाइया रूपकनाट्य रचित हइते पारे, किन्तु प्रकृतिके प्रकृति राखिया एमन अन्तरङ्ग करिया तोला, ताहार द्वारा नाटकेर एत कार्य साधन कराइया लओया, एतो अन्यत्र देखि नाइ।" (प्राचीनसाहित्य/ रवीन्द्रनाथ)॥

## उपसंहार :

महाकवे: कालिदासस्य प्रकृतिचित्रस्य पर्यालोचनेन इदं स्पष्टं भवति यत्, जगति सौन्दर्यवह्नि: प्रकृत्यां रमते, अभ्यन्तरिक्यामपि प्रकृत्यां तदेव विलसति। इत्थं सौन्दर्यदृष्ट्या कालिदासस्य कवित्वे प्रकृतौ मानवे च कोऽपि भेदो नासीत्, अपि तु तत्रासीत् पूर्णमद्वैतम्। महाकविना इयमेव समपक्षपातया भक्त्या असेवत।

# ६. सहायकग्रन्थपञ्जी

१) कालिदासः अभिज्ञेनशाकुन्तलम्, सम्पा....... ड........ अनीलचन्द्र वसु संस्कृत बुक डिपो डिपोकलकाता २०२७ पुनर्मुद्रणम्।
२) कालिदासः अभिज्ञेनशाकुन्तलम्, सम्पा....... ड... नारायन चक्रवर्ती संस्कृत पुस्तक भाण्डार, कलकाता २००५।
३) कालिदासः अभिज्ञेनशाकुन्तलम्, सम्पा...... ड..... श्री अशोक कुमार वन्द्योपाध्याभः सदेश कलकाता, २००४।
४) कालिदासः अभिज्ञेनशाकुन्तलम्, सम्पा....... ड..... नीर्मल्य दास डिटाका सृडेन लाइब्रेरी, कलकाता २०२२ प्रथम संस्करणम्।
५.) कालिदासः प्रणीत अभिज्ञानशाकुन्तलम्, सम्पा....
ड...... प्रभाकर शास्त्री, ड.... रूपनारायणत्रिपाठी
६.) कालिदासः विरचितम् अभिज्ञानशाकुन्तलम्,
भारतीय विद्या संस्थान।


अभिज्ञानशाकुन्तलम्

# অভিজ্ঞান-শকুন্তলম্

সম্পাদক

ডঃ সত্যনারায়ণ চক্রবর্তী

সংস্কৃত পুস্তক ভাণ্ডার


অভিজ্ঞান
শকুন্তলম্
ডঃ অনিলচন্দ্র বসু
সংস্কৃত বুক ডিপো

# অভিজ্ঞান-শকুন্তলম্

সম্পাদক

ড. সত্যনারায়ণ চক্রবর্তী

সংস্কৃত পুস্তক ভাণ্ডার


अभिज्ञानशाकुन्तलम्
(चतुर्थ अंक)
डॉ. जगदीश प्रसाद शर्मा कौडिन्य


अभिज्ञान
शाकुन्तलम्

# अभिज्ञान शाकुन्तलम्

## की पुनर्मीमांसा



प्रो. वेदप्रकाश उपाध्याय

# SALTORA NETAJI CENTENARY COLLEGE

**PROJECT 2022-23Your text here 4**

Subject : Sanskrit (Honours)

Course ID : 20912

Course Code : AHSNS 202C-4

Course Title : Classical Sanskrit Literature (Drama & Prose)

Title of the Project Paper :

'अभिज्ञानशकुन्तलम्' इति नाटके कालिदासस्य प्रकृतिचित्रणम्

Name of the Student : Arpita Pramanik

Semester : II

UID NO : 22191109003

Class Roll No : 696

# सूचीपत्रम्


| क्रमिकसंख्या | विषयः | पृष्ठसंख्या |
|---|---|---|
| १ | काङ्गित्स्वीकारः | 1 |
| २ | उद्देश्यम् | 2 |
| ३ | भूमिका | 3 |
| ४ | वर्णनीयविषयः | 3-6 |
| ५ | उपसंहारः | 6 |
| ६ | सहायकग्रन्थपञ्जी | 7 |


~~कृतज्ञस्वीकार~~

## १. कार्तज्ञत्वस्वीकारः

सर्वप्रथमं मम मार्गदर्शिका प्रधानाध्यापिका पूजनीया सुस्मिता: सान्तरामहोदया प्रति मम हार्दिक कार्तज्ञं ज्ञापयामि। अपि च प्राचार्यसहितान् सर्वान् प्राध्यापकान् प्रति धन्यवादं ज्ञापयामि, ये मम कार्यस्य निष्पादने अमूल्यसमयेन सह सहायतां कृतवन्तः।

सुस्मिता सांतरा
शिक्षिकाया: स्वाक्षरः
दिनाङ्कः :- ३१/५/२०२३

अर्पिता प्रामानिक
छात्री- स्वाक्षरः
दिनाङ्कः :- ३१.०५.२०२३


মহাকবি
কালিদাস

# २. उद्देश्यम्

मम अस्य परियोजनाकार्यस्य (Project work) द्वयस्य
उद्देश्य भवति यथा-

१) सङ्क्षेपेण विविधरचनासु कालिदासस्य प्रकृतिचित्रस्य वर्णनं

२) कालिदासस्य सर्वश्रेष्ठरचनायाम् अभिज्ञानशाकुन्तले-
कालिदासस्य प्रकृतिचित्रस्य वर्णनम्।

३) विविधरचनासु कालिदासस्य प्रकृतिचित्रणेन द्वारा -
- कालिदासस्य प्रकृतिप्रेमतः परिस्फुटनम्।





## ३. भूमिका

महाकवे: कालिदासस्य ~~प्रक~~ प्रकृतिचित्रस्य पर्यालोचनेनेदं स्पष्टं भवति यत् जगति यत् सौन्दर्यं तद्हि: प्रकृत्यां रमते अभ्यन्तरिकमपि प्रकृत्यां तदेव विलसति। तु सौहृदयदृष्ट्या कालिदासस्य कवित्वे प्रकृतौ मानवे च कोऽपि भेदो नासीत् अपि तु तत्रासीत् पूर्णाभिन्नत्वम्।

महाकवे: कालिदासस्य प्रकृतिप्रणय: ऋतुसंहारस्य सामान्यपरिचयात् क्रमेण उत्तरोत्तरं विकसित: सन् पूर्णरूपेण "अभिज्ञानशाकुन्तलम्" नाटके परां प्रौढिमवाप।

## ४. वर्णनीयविषय:

महाकवे: प्रकृतिप्रणय: ऋतुसंहारस्य सामान्यपरिचयात् क्रमेण उत्तरोत्तरं विकासित: सन् "अभिज्ञानशाकुन्तलम्" नाटके परां प्रौढिमवाप।

अस्य ऋतुसंहारे प्रकृतिर्न केवलमुद्दीपनरूपे चित्रिता अभवत्, परं तु स तत्रा- ~~लम्बनीय~~ लम्बनरूपेऽपि वर्णिता आसीत् मालविकाग्निमित्रे महाकविना कमनीयकलेवरा मालविका प्रकृतिदेव्या: प्रतिमूर्तित्वेन कल्पयित्वा सन्निवेशिता कुमार- सम्भवे महाकवि: प्रकृतिपुत्र्या: जन्मस्थलीभूतस्य हिमालयस्य हृद्यं वर्णनं कृत्वा स्वकवितापा: अनघं मानदण्डं विद्वन्निवहानां पुरत: समुपस्थापितवान। विक्रमोर्वशीयां प्रकृति: हेमकूटराज्योद्यानादिषु अप्सरसां रुपेषु च आत्मानं परिणमयन्ती वीक्षते। रघुवंशेऽपि प्रकृति: समुद्ररुपं परिगृह्य कुचित् तपोवनस्य रुपं परिधाय कुचिच्च त्रिवेणीभूता समुपस्थिता। तस्य मेघदूताख्यभूतं खण्डकाव्यं वस्तुत: प्रकृतेरेव काव्यमासीत्। यस्मिन्



काव्य धूमज्योतिसलिलमरुतां सन्निपातः मेघः एव विरहिणो यक्षस्य सहृदय-सखा इव सन्देशहरः।

काव्यमिदं प्रकृतेस्तुपमा रङ्गशाला इव भाति। यथा प्रेक्षागृहे उपविष्टः सहृदयः प्रेक्षकः यथा रङ्गमध्ये विविधानि विचित्राणि दृश्यानि पश्यति, तथा, अत्रोऽपि सहृदयः पाठकः ~~अ~~ स्नसमक्षे चित्ताकर्षकाणि प्रकृतेः बहूणि रूपाणि नवनवानि प्रेक्षते, यानि कवेः प्रकृतिं प्रति निगूढम् आकर्षणं तच्चित्रणकौशलं च प्रकटयन्ति। यद्यपि प्रकृतिवर्णना महाकवेः सर्वासु रचनासु न्यूनाधिकं संलक्ष्यते, तथापि तद्गुणेनायां महाकवेः इतरकविविलक्षणा या प्रतिभा सा तु तस्य अभिज्ञानशाकुन्तलम्" नाटके बाहुल्येन लक्ष्यते। अस्मिन् ~~प्रकृत्यङ्गभूतानि सब~~ नाटके प्रकृतिः यादृशी प्रधानता गमितासीत न तादृशी कस्मिंश्चिदन्यस्मिन् काव्ये नीता ~~दा... क्षेत्र। व बतीस्य~~ नाचेतनादीनि प्रकृत्यङ्गभूतानि सर्वाणि अत्र महाकवेः लेखनीस्पर्शेन न केवलं मानवप्रकृत्या तादात्म्यं लभते, परं तु पशुपक्षिवृक्षलतादिकम् आत्मभावं रक्षित्वापि मानवैः सह आत्मीयतां भजते मानववत् आचरति च। अत्र जडप्रकृतिरपि ईदृशी संवेदनशीला प्रदर्शितास्ति यत सा तेषां सम्पत्तौ हर्षोत्फुल्ला, विपत्तौ च तेषां विमर्षा भवन्ति। नाटकेऽस्मिन् वस्तुतः अन्यपात्राणामिव प्रकृतेरपि प्रमुखा भूमिकास्ति या कथमपि न उपेक्षणीया।

अस्य रूपकस्य आख्यानं स्वयमेव प्रकृतेरुत्सङ्गे विकसितम् अभवत्। अस्य नायिका शकुन्तला प्रकृतेः पुत्री इव सस्नेहं लालिता रक्षिता च आसीत। तस्याः हृदयलतिका चेतनाचेतनानि ~~अभवत्। अस्य~~ सर्वाणि स्नेहस्य ललितबन्धनेन मनोहरम् आकर्षानि अकरोत। नियतम् आलवाले जलसिञ्चनेन सह सा तपोवनस्य वृक्षलतादिकं सोदरस्नेहेन अभिषिकरोत्।

तपोवनस्य ~~सर्वैः~~ चेतनाचेतनपदार्थैः सह शकुन्तलायाः



ईदृशम अन्तरङ्गम आत्मीयत्वं ईदृशं च कल्याणवर्धनम आसीत् यत तस्याः पतिगृहयात्राकाले वनदेवता पितृकुटुम्बिन इव तस्यै मण्डनार्थं वस्त्राभरणानि उपढौकन्ते स्म, काश्यपः तस्याः तपवनत्यागे स्वजनान् इव तपोवनप्रकृतिभूतान् वृक्षलतादीन् अनुज्ञां याचते कोकिलाः मधुररुतेन अनुज्ञां ज्ञापयन्ति स्म। अस्मिन्वियोगे न केवल शकुन्तला, तथाचोक्तं-"

"उद्गलितदर्भकवलाः मृगाः परित्यक्तनर्तनाः मयूराः
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणि इव लता॥" इति।

मृगशिशुः आसन्नमातृवियोगभिया शकुन्तलायाः वस्त्राञ्चलाग्रं गमनान्निवारयति। कविवाणिनि सर्वं कारुण्यं साक्षादिवाक्ष्य स्वसतां निस्मृताः तपोवनसत्त्वैः सह तादात्म्यं भजन्त्य। अस्मिन् नाटके वर्णिता प्रकृतिः न कदापि वहिरतिहत परं तु शकुन्तलाचरित्रे एव तस्याः उन्मेष साफल्येन कृतः। अतः सम्बन्धः, तथा अत्रापि तपोवनपरिवेशेन सह शकुन्तलायाः स्वाभाविकः सम्बन्धः। अस्मिन् विषये रवीन्द्रनाथस्य मन्तव्य-मुद्धृत्य उपसंहारः क्रियते —

"अभिज्ञानशकुन्तलनाटके अनसूया प्रियंवदा येमन, कण्व येमन दुष्मन्त येमन, तपोवन प्रकृतिओ तेमनि एकजन विशेष पात्र। प्रधान, एमन अत्यावश्यक स्थान केओ पाइने पारे, बोधकरि, संस्कृतसाहित्य छाड़ा अर कोथाओ देखा याय नाई। प्रकृतिके मानुष करिया तुलिया ताहार मुखे कथावार्ता



बसाइया रूपकनाट्य रचित हइते पारे, किन्तु प्रकृतिके प्रकृति राखिया एमन अन्तरङ्ग करिया तोला, ताहार द्वारा नाटकेर एत कार्य साधन कराइया लओया, एतो अन्यत्र देखि नाइ" (प्राचीनसाहित्य/ रवीन्द्रनाथ)॥

## उपसंहार :

महाकवेः कालिदासस्य प्रकृतिचित्रस्य पर्यालोचनेन इदं स्पष्टं भवति यत्, जगति सौन्दर्यवद्धिः प्रकृत्यां रमते, अभ्यन्तरिक्यामपि प्रकृत्यां तदेव विलसति। इत्थं सौन्दर्यदृष्ट्या कालिदासस्य कवित्वे प्रकृतौ मानते च कोऽपि भेदो नासीत्, अपि तु तत्रासीत् पूर्णमद्वैतम्। महाकविना इयमेव समपक्षपातया भक्त्या असेवत।

## ६. सहायकग्रन्थपञ्जी


१.> कालिदास: अभिज्ञेनशाकुन्तलम, सम्पा..... ड..... अनीलचन्द्र वसु संस्कृत बुक डिपो डिपोकलकाता २०२६ पुनर्मुद्रणम्।

२.> कालिदास: अभिज्ञेनशाकुन्तलम, सम्पा..... ड.... नारायन चक्रवर्ती संस्कृत पुस्तक भाण्डार, कलकाता २००५।

३.> कालिदास: अभिज्ञेनशाकुन्तलम, सम्पा..... ड.... श्री अशोक कुमार वन्द्योपाध्याय: सदेश कलकाता, २००४।

४.> कालिदास: अभिज्ञेनशाकुन्तलम, सम्पा..... ड.... नीमेल्य दास डि टाका स्टुडेन लाइब्रेरी, कलकाता २०२२ प्रथम संस्करणम्।

५.> कालिदास: प्रणीत अभिज्ञानशकुन्तलम्, सम्पा... ड..... प्रभाकर शास्त्री, ड.... रुपनारायणत्रिपाठी

६.> कालिदास: विरचितम् अभिज्ञानशकुन्तलम्, भारतीय विद्या संस्थान।


अभिज्ञानशाकुन्तलम्

# অভিজ্ঞান-শকুন্তলম্

সম্পাদক

ড: সত্যনারায়ণ চক্রবর্তী

সংস্কৃত পুস্তক ভাণ্ডার


অভিজ্ঞান
শকুন্তলম্
ডঃ অনিলচন্দ্র বসু
সংস্কৃত বুক ডিপো

# অভিজ্ঞান-শকুন্তলম্

সম্পাদক

ড. সত্যনারায়ণ চক্রবর্তী

সংস্কৃত পুস্তক ভাণ্ডার


अभिज्ञानशाकुन्तलम्
(चतुर्थ अंक)
डॉ. जगदीश प्रसाद शर्मा कौडिन्य


अभिज्ञान
शाकुन्तलम्

# अभिज्ञान शाकुन्तलम्

## की पुनर्मीमांसा



प्रो. वेदप्रकाश उपाध्याय

# SALTORA NETAJI CENTENARY COLLEGE

## PROJECT 2022-23

B.A. 4th SEMESTER (HONOURS)

Subject : Sanskrit (Honours)

Course ID : 40915

Course Code : AHSNS 405SEC-2

Course Title : Spoken Sanskrit & Communicative English

Title of the Project Paper :

"काव्येषु नाटकं रम्यम्"

Name of the Student : SHRABANI KARMAKAR

Semester : IV

UID NO : 21191109007

Class Roll No : 192

# सूचीपत्रम्


| क्रमिकसंख्या | विषयः | पृष्ठसंख्या |
|---|---|---|
| १ | कार्तज्ञात्वस्वीकारः | १ |
| २ | उद्देश्यम् | १ |
| ३ | भूमिका | २ |
| ४ | वर्णनीयविषयः | ३ |
| ५ | उपसंहारः | ६ |
| ६ | सहायकग्रन्थपञ्जी | ७ |

## कार्तज्ञत्वस्वीकारः

सर्वप्रथमं मम मार्गदर्शकं पथप्रदर्शकं पूजनीय कौशिक-पात्रः इति महोदयं प्रति मम हार्दिकं कार्तज्ञं ज्ञापयामि। अपि च प्राचार्यसिद्दितान् सर्वान् प्राध्यापकान् प्रति धन्यवादं ज्ञापयामि, ये मम कार्यस्य निष्पादने अमूल्यस्मयेन सहकार्येण सह सहानुभूतिभिः साहाय्यं कृतवन्तः।

## उद्देश्यम्

अस्य परियोजना कार्यस्य (project work) उद्देश्यम् भवति –

(i) काव्यस्य स्वरूपम् काव्यस्य भेदः विषये च आलोचनम्।
(ii) विशेषतः नाटकस्य स्वरूपम् इति विषये आलोचनम्।
(iii) नाटकस्य प्रयोजनानि इति विषये आलोकपातः।
(iv) नाटकानां रम्यत्वम् इति विषये आलोकपातः।
(v) संस्कृत साहित्ये नाटकानां महत्वम् इति विषयः ज्ञापनम् विविधानि।

(1) घ) काव्येषु नाटकं रम्यम् ।

=> "श्रव्यं सहृदयास्वाद्यं नाट्यं दृश्यागुणोन्नतम् ।
रत्नोत्तरञ्जनात् प्रेयो रसभावविबोधकृत ॥"

भूमिका :=> नाट्यसाहित्यमेवेदं संस्कृतसाहित्यमुकुटे हीरकखण्डमिव जाज्वल्यते। काव्येषु नाटकं श्रेष्ठं मन्यते। नाटकं संस्कृतसाहित्यस्य गौरवपूर्णविभास्ति। भारतीयनाट्यरचनायाः प्रयोजनं नितान्तं गम्भीरं व्यापकं सार्वभौमञ्चोति।
"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" इत्यनुसारेण प्रयोजनमूलैव सर्वेषां प्रवृत्तिः। परमानन्दलाभं रसास्वादनं वा काव्यादेः अध्ययनस्य प्रयोजनमिति। अतः केवलं सहृदयः एव काव्यरसार्णवे निमज्जितुं समर्थः। काव्यरसस्य आनन्दार्थं कवित्वमयवातावरणस्य महत्साहाय्यकता वर्तते। परं नाटके अयं वातावरणं स्वयमेवं उपस्थाप्यते। अतेन नाटकं सर्वजनग्राह्यं प्रभावशालीनं चेति। वस्तुतः नाटकं हि काव्यस्य रचनसीमा मन्यते — 'नाटकान्तं कवित्वम्'। भारताचार्यानुसारेण नाटकस्य महदुद्देश्यं वर्तते। तेनोक्तम् —
"त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।" (नाट्यशास्त्र)
सर्वेषां मनोरञ्जनस्य साधनं भवति नाटकम्। सर्वजनहिताय सर्वजनसुखाय च नाटकस्य निर्मितं भवति। यतो हि देवसमाजहितान्निमेच्छया ब्रह्मणा नाटकस्य सृष्टिः कृता।
ततोच्यते —
"क्रीडानीयकमिच्छामि दृश्यं श्रव्यं च यद् भवेत्।
तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम्" (ना॰शा-१/२)

वर्णनीयविषयः =>

कामभेदाः => (२.२) वैदिकं लौकिकञ्चेति काव्यं द्विविधम्। वैदिकं तु वेदब्राह्मणादि ईश्वरप्रोक्तम्। लौकिकं तु रामायणमहाभारतादि। ततोक्तम् —

वैदिकं लौकिकं चेति द्विविधं काव्यमुच्यते।
गद्यपद्यविभेदेन तच्चतुर्धा व्यवस्थितम्॥

पुनः लौकिककाव्यं द्विविधम् — दृश्यं श्रव्यञ्चेति। श्रव्यकाव्यं तु श्रवणयोग्यम्। तत् काव्य-महाकाव्य-नीतिकाव्यादिभेदेन बहुविभक्तम्। दृश्यकाव्यं तु अभिनययोग्यम्। ततोक्तं विश्वनाथेन — दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम्॥ (सा.द- ६/१)
अवस्थानुकृतिर्नाट्यम्। रूपकं तत्समारोपात्।
(दशरूपक १/७)

'नट' धातोः 'नाटकम्' शब्दोऽयं निष्पन्नः। लोके विद्यमानानां दृतिवृत्तानां घटनानां वा चित्रणमेव नाटकम्। ततोच्यते कालिदासेन —
"नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।"

(२) नाटकानां रम्यत्वम् => नाटके साक्षात् रूपेण दर्शनस्य सुविधा अत्र वर्तते। कस्यापि घटनायाः कारित्याः वा साक्षाद्दर्शनं श्रमात् रमणीयं भवति। संस्कृतसाहित्ये बहूनि नाटकानि निबद्धानि, तेषु अभिज्ञान-शकुन्तलम् निःसंशयेन उत्कृष्टम्। ततोच्यते केनापि समालोचकेन —
"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्॥"

अस्मिन्नाटके प्रकृतिवर्णनम्, चरित्रचित्रणस्य चातुर्यम्, वर्णनानैपुण्यम्, अलंकारयोजना, रसपरिपाकः, घटनासंयोजनम्,

प्रसादगुणसम्पन्ना वैदर्भीरीतिः सर्वमेव सार्थकरूपेण विराजते। मानवानां सर्वाङ्गीणविकासे रूपकस्य महत्त्वपूर्णं योगदानं दृश्यते। ततोच्यते अलङ्कारशास्त्रे —

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥
(ना·शा·-२/११७)

नाटकं सार्ववर्णिकमशास्त्रं नटराजशिवेन रूपकं संसृज्य समग्रावा भावना स्थापिता। एतेन रूपकशिल्पकस्य सर्वाणि उद्देश्यानि, प्रयोजनानि च साधयितुं शक्यते। ततोच्यते सविस्तारेण भरतेन तस्य नाट्यशास्त्रे —

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतद् भविष्यति॥
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति॥

( ३ ) नाटकस्य स्वरूपम् => रूपकं संस्कृतसाहित्यस्य गौरवपूर्णमङ्गमस्ति। "तद्रूपारोपात्तु रूपकम्" तद्रूपकमभेदो यः उपमा - उपमेययोः," "रूप्यतेति रूपकम्," "उपमानोपमेययोः साम्यप्रदर्शनाय कल्पनिकाश्रेयारोपः रूपकम्" इति रूपकस्य व्युत्पत्तयः। रूपकस्य प्रवर्तकः भरतमुनिः रूपकं सार्ववर्णिकपञ्चमवेद इति वर्णितम् —

"जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥"

भारतासरेणा देवानां प्रार्थनया ब्रह्मदेवः ऋग्वेदात् पाठ्यम्, यजुर्वेदादभिनयम्, सामवेदात् गीतम्, अथर्ववेदात् रसः आरम्यते सूत्रधारैः अभिनेतैः वेषभूषादिभिः हावभावैः, क्रियाकलापैश्च अभिनयं कुर्वन्ति।

नाटके चतुर्विधो अभिनयो भवति — १. सात्विकः, २. आङ्गिकः, ३. वाचिकः, ४. आहार्यश्चेति । नाटकेन जनानां बहुविधानि आघातानि सम्भवति ।

(4) नाटकस्य प्रयोजनानि => भरतमुनिना रूपकशास्त्रे रूपकस्य त्रीणि प्रयोजनानि उक्तानि । यथा च —

१. हितोपदेशजनकम् => दैनन्दिन - श्रामिक - कार्मिक - कर्षक - जीवने श्रान्ताः क्लान्ताः जनाः मानसिकं आनन्दं अनुभवन्ति ।

२. विश्रान्तिजनकम् => दुःखार्तानां श्रमार्तानां, शोकार्तानां कृते विश्रान्तिः कल्पनम् ।

३. विनोदजनकम् => मनोरञ्जनस्य साधनेषु नाटकं लोकप्रियमस्ति। छात्राणां शिक्षणाय जनानां उपदेशाय च रूपकस्य प्रयोगः भवति।

(5) रूपकस्य प्रकाराः => रूपकनिस्याः पूतधारायाः दशानांतेषां उत्पत्तिः भवति । तद् यथा — १. नाटकम् २. प्रकरणम्, ३. भाणम्, ४. व्यायोगः, ५. समवकारः, ६. डिमः, ७. ईहामृगः, ८. अङ्कः, ९. वीथी, १०. प्रहसनम् तत सह अष्टकम् ८. नाट्यरासकम् - उपरूपकानि सन्ति — १. नाटिका, २. त्रोटकम् ३. गोष्ठी ४. सट्टकम्, ५. नाट्यरासकम्, ६. प्रस्थानम् ७. उल्लाप्यम् ८. काव्यम् ९. प्रेङ्खणम् १०. रासकम्, ११. संलापम, १२. श्रीगदितम्, १३. शिल्पकम्, १४. विलासिका, १५. दुर्मल्लिका, १६. प्रकरणी, १७. हल्लीश, १८. भाणिका इति । दशरूपकेषु नाटकम् प्रथमो भेदः । अतः सर्वाणि रूपकानि नाटकमुच्यते ।

(6) संस्कृतसाहित्ये नाटकानां महत्त्वम् =>

क्वचिद् धर्मः क्वचित् क्रीडा क्वचिदर्थः क्वचिच्छमः ।
क्वचिद् हास्यं क्वचिद् युद्धं क्वचित् कामः क्वचिद् वधः ॥

(नाट्यशास्त्र-१/१०८)

शपिताहीते दुर्बलानांदि शक्त्यः सञ्चारं करोति नाटकम् ।

उत्सहं वर्धयति, ज्ञानं प्रददाति च। नाटकं लोकवृत्तस्यानु-करणमस्ति। —

"नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्॥"

(ना.शा - 2/222)

नाट्यशास्त्रे आचार्येण भरतेन उक्तम् - नाट्येन वैदिकं शिक्षां, क्वचित् ऐतिहासिकं, क्वचित् आख्यानं, क्वचित् च आचारशिक्षाम्, समाविशयते —

वेदविद्येतिहासनाम् आख्यानपरिकल्पनम्।
विनोदकरणं लोके नाट्यमेतद् भविष्यति॥

(ना. शा. २/२२२)

नाटकस्य महत्त्वविषये महाकविकालिदासेनापि उक्तं मालविकाग्निमित्रे —

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम्।

उपसंहारः => नाटकं सर्वेषामपि अभीष्टं साधयति। तद् यथा — धार्मिकानां कृते धर्मचर्चा, विषयीनां कृते विषयोपभोगः, ज्ञानहीनानां कृते ज्ञानोपदेशः, धीमतां कृते ज्ञानवर्धनम् धनीनां कृते विलासः अर्थानुरागीनां कृते अर्थोपार्जनम्। ततोच्यते केनापि कविना — "काव्येषु नाटकं रम्यम्।"

## सहायकग्रन्थपञ्जी

(i) भरतमुनिः - नाट्यशास्त्रम् - सम्पादकः - कन्हैयालाल जोशी, कलकाता, १९५२ ।

(ii) साहित्य दर्पनम् - विश्वनाथ कविराज, सम्पादकः - अध्यापकः डः श्रीविमलाकान्त मुखोपाध्याय ।, कलकाता, २८९६

(iii) धनञ्जयः - दशरूपकम् - सम्पादकः - डः रमाशङ्कर त्रिपाठी, अनुवादः - पीना लाइब्रेरी, चौखम्भा विद्याभवन, दिल्ली, २००१ ।

Shrabani Karmakar
Signature of the Student

Kousik Patra
Signature of the Teacher

# SALTORA NETAJI CENTENARY COLLEGE

B.A 6th Semester (Honours) Internal Assessment 2022-23

Name - Sarmila Mahato
Roll No - 221
Subject - Sanskrit (Honours)
Course Id - 60916
Cours code - AHSNS 603DSE-3
Course Title - Kavya

"काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्"

१. भूमिका -

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति उक्तिस्तु सुप्रसिद्धा एव। ननु एतादृशस्य काव्यस्य निर्माणे किं प्रयोजनम् इति प्रश्नः सर्वेषां मनसि आयाति। तत्र काव्यतत्त्वज्ञा आलङ्कारिकाः बहुधा काव्यस्य प्रयोजनानि प्रोक्तवन्तः।

कोऽपि कार्यारम्भात्प्रागेव विवेकधिया प्रयोजनं परामृशति। अपि च ग्रन्थारम्भे प्रयोजनं विषयमधिकारिणं सम्बन्धञ्चेति 'अनुबन्धचतुष्टयम्' निर्दिशन्ति संस्कृतग्रन्थकाराः। अतस्तां पद्धतिमनुसृत्य आचार्यः वामनोऽपि काव्यालंकारसूत्रवृत्तिग्रन्थस्य प्रथमाधिकरणस्य प्रथमाध्याये काव्यस्य प्रयोजनं प्रस्तौति। यथा - "काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्"

२. अन्यान्यालंकारिकनये काव्यप्रयोजनम् -

२.१ मम्मटनये काव्यप्रयोजनम् -

तत्र काव्यप्रकाशकारस्य मम्मटाचार्यस्य इदं मतं तावत्

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे"॥ इति।

यशसे, अर्थकृते, व्यवहारविदे; शिवेतरक्षतये, सद्यः परनिर्वृतये; कान्तासम्मिततया उपदेशयुजे च काव्यं भवति। काव्यं कीर्तिं जनयति, अर्थं प्रददाति, व्यवहारज्ञानं च ददाति। काव्यद्वारा भगवन्नारायणादीनां पूजनेन शिवेतरस्य अमङ्गलस्य प्रशमनं भवति। काव्यं श्रवणेन ब्रह्मानन्दसहोदरं रसं जनयति। काव्यं भवति कान्तासम्मितं वचः। वेदाः प्रभुसम्मिताः भवन्ति। ते प्रभुवत् 'सत्यं वद धर्मं चर' इत्यादिकम् उपदिशन्ति। परन्तु काव्यं प्रिया एव भवति। प्रिया अर्थात् भार्या यथा मधुराभिः वाग्भिः भर्तुः कृत्याकृत्यविवेकं जनयति तथैव काव्यं सरसया शैल्या रामादिवद् वर्तितव्यम्, न रावणादिवत् इत्यादिकृत्याकृत्यविवेकं जनयति।

२.२ विश्वनाथनये काव्यप्रयोजनम् -

एवमेव विश्वनाथः कथयति -

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥" इति।

चतुर्वर्गो नाम धर्मः, अर्थः, कामः मोक्षः च । भगवन्नारायणस्तवादिना "एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति" इत्यादिना वचनेन च काव्याद् धर्मप्राप्तिः । श्रीहर्षनाम्ना रत्नावलीनाटिकानिर्माणेन धावकः बहूनि धनानि लब्धवान् । कामप्राप्तिश्च धनैरेव भवति । मोक्षप्राप्तिः काव्यजन्यस्य धर्मादिफलस्य अनुसन्धानात् भवति । किञ्च, मोक्षोपयोगिवाक्येषु व्युत्पत्तिकारकं भवति काव्यम् । एवं चतुर्वर्गफलप्रापकं काव्यम् ।

## २.३ भामहनये काव्यप्रयोजनम्:

एवमेव भामहाचार्यः आह–

> " धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
> करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम् ॥" इति ।

चतुर्वर्गफलप्राप्तिः वेदादिशास्त्रेभ्यः नीरसतया भवति, काव्यात् तु सरसतया इति काव्यस्य विशेषः ।

## ३. आलंकारिकवामननये काव्यप्रयोजनम्-

आचार्यवामनविरचिते काव्यालंकारसूत्रवृत्तिग्रन्थे प्रथमाधिकरणे प्रथमाध्याये ग्रन्थकृता काव्यस्य प्रयोजनम् उक्तं यथा- काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात् । इति । सूत्रेऽस्मिन् सत् इत्यस्यार्थः चारु इति । कामधेनुकारेणोक्तं "सालंकारतया सुन्दरमित्यर्थः"।
तत् सुन्दरं काव्यं दृष्टार्थम् अदृष्टार्थम् अदृष्टार्थं चेति काव्यस्य प्रयोजनयुगलमुक्तम् । तत्र काव्यं हि दृष्टार्थं प्रीतिजनकत्वात्, अदृष्टार्थं कीर्तिजनकत्वात् । तस्मात् काव्यस्य द्वे प्रयोजने प्रीतिः कीर्तिश्चेति । तत्र प्रीतिर्हि इहलौकिकं प्रयोजनम् अत एव तत् दृष्टार्थमित्युच्यते । कीर्तिश्च पारलौकिकं प्रयोजनम्, इत्यतः तद् अदृष्टार्थमित्युक्तम् ।
प्रीतिशब्दस्यार्थः आनन्दः गोपेन्द्रेणोक्तम् प्रीतिशब्देन श्रवणसमनन्तरमेव सहृदयहृदयेषु जायमाना या रसास्वादलक्षणा या च पुनरर्थप्राप्त्यनिष्टपरिहारनिबन्धना सेयमुभयविधा प्रीतिर्विवक्षिता एषा प्रीतिः सहृदयस्य काव्यपाठकाले तथा रचनावसाने स्वकीयकाव्यपाठेनापि कवेरपि भवितुं शक्यते इति मन्तव्यम् ।

कीर्तिवर्द्धन स्वर्गरूपं फलमुच्यते । एषा हि पारलौकिकी प्राप्तिः । किन्तु कीर्तिवर्द्धनचेत कविख्यातिरुच्यते तर्हि । इहलोके तिष्ठन्नेव तां कीर्तिं लब्धुं शक्नुयात् कविः कालिदासरवीन्द्रनाथादिवत् ।

ननु कीर्तिरपि प्रीतिस्वरूपा । तस्मात् कथं कीर्तिं पृथक्तया उक्ता ? तत्रोच्यते कामधेनुकारेण –

यन्नदुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम् ॥

इत्येवं लक्षणायाः दृष्टप्रीतिविलक्षणाया अदृष्टप्रीतेः पृथङ्निरूपणीयत्वात् काव्यस्य तन्मूलतया लोकातिशयत्वं प्रकाशितम् इति द्वैतन्तरम् अपास्तम् ॥"

"प्रतिष्ठां काव्यबन्धस्य यशसः सरणिं विदुः ।
अकीर्तिवर्तिनीं त्वेवं कुकवित्वविडम्बनाम् ॥
कीर्तिं स्वर्गफलामाहुरासंसारं विपश्चितः ।
अकीर्तिं तु निरालोकनरकोद्देशदूतिकाम् ॥"

उत्तमकाव्यस्य रचनां कृत्वा कविः वास्तविकं वास्तविकं कीर्तिं प्राप्नवान । यदि काव्यम् न साधु स्यात् तर्हि कविः अकीर्तिं निन्दां वा अलभत । अतः कीर्तिप्राप्त्यर्थम् अकीर्तिनिवारणाय च कविभिः विशेषतया काव्यालङ्कारसूत्रार्थः अनुशीलनीयः कवीनां कृते अलङ्कारशास्त्रस्य अभ्यासः अत्यावश्यकः ।

"तस्मात् कीर्तिमुपादातुमकीर्तिं च निबर्हितुम् ।
काव्यालंकारसूत्रार्थः प्रसाद्यः कविपुङ्गवैः ॥"

४. **उपसंहारः**

आचार्यवामनेन प्रीतिरूपं यत् प्रयोजनमउक्तं तदेव काव्यस्य मुखं प्रयोजनम्। काव्यं यतः कलाविद्या अस्ति अतः काव्यस्य प्रथमं प्रधानं च प्रयोजनम् अस्ति आनन्दलाभः। नाट्यशास्त्रे भरतमुनिना उक्तम् - प्रीतिरेव प्रधानम्" वस्तुतः शिल्पकलायाः अन्यत किमपि प्रयोजनं नास्ति। Art for Arts sake (आर्ट फर आर्ट्स सेक) इत्यस्य मते मनोरञ्जनात् परं काव्यकलायाः अन्यत् किमपि प्रयोजनं प्रदर्शयितु निरर्थकं भवति। कविः सहृदयः पाठकः च उभौ काव्यद्वारा आनन्दं प्राप्य धन्यौ भवतः इति शम्।

# सहायकग्रन्थपञ्जी

१) वामनः काव्यालंकार सुत्रवृत्ति श्री गोपेन्द्रत्रिपुरहरभुपालविरचिता कामधेनु व्याख्यासहिता व्याख्याकार श्री बं केदारनाथ शर्मा, प्रकाशन चौखम्बा कृष्ण दास अकादेमी वाराणसी ।

२) वामनः काव्यालंकारसुत्रवृत्तिः ('काव्यालंकारदीपिका' हिन्दिव्याख्या-दि भुषिता व्याख्याकार आचार्यः विश्वेश्वरः सिद्धान्तशिरोमणि, सम्पादक डॉ नगेन्द्र, प्रकाशन हिन्दीमाध्यम् कार्यान्वय निदेशालयः दिल्ली विश्वविद्यालय २००१ ।

३) वामन काव्यलंकार सुत्रवृत्ति, सम्पादकः ड. अनिलचन्द्र वसु प्रकाशत संस्कृत बुक डिपो, कोलकाता २००५

४) वामन काव्यलंकारसुत्रवृत्ति, सम्पादिका ड. सुमिता वसुः बि. एन. पावलिकेशन् कोलकाता, २०२८ ।

Signature of Teacher